रघुवंशटीकायाः संजीविनी
समाख्यायाद्वादशः सर्गः

रू ५९

पुस्तकं कितने पत्र २२
वर्तमान

१२ पत्राणि

आदि पत्र ११ नहीं है

नयोरिति। पितृव्यापत्तिः पितृमरणं नवीभूता पितृव्यापत्त्या आरूढा अशोकोपयोस्तेन तयोः समवयोस्ति स्मिन्न रणोद्धे पितरी वा
ग्नि संस्कार इ ग्नि संस्कारमारभ्य पराउत्तराः क्रिया वर्त्तिरेख यत्नेन तु स्यापि स्तव हार्धे हेति कं चक्रे तु रित्यर्थः ॥५६॥ वधेति॥
वधेन रामसूत्रेन निर्धूत शापः स्यवभुवं गतस्य कबंधस्य रत्नोर्वि शेषपक्षउपदेशतो रामस्य समाने व्यसने समानापदि सं
नयो। तस्मिन्न वीभूता पितृव्यापत्ति शोकयोः॥ पितरि वाग्नि संस्कारानुतरा वर्त्तते क्रियां॥ ५६॥ वधनिर्धूतशापस्य
कबंधस्योपदेशतः॥ सुग्रीवं संख्यं रामस्समानव्यसने हरौ॥५७ ॥ स हत्वा वालिनं वीरं तत्र हे चिरकांक्षिते॥
धातोः स्थाने हरौ वाहेशं सुग्रीवं संन्यवेशयत्॥ ५८॥ ॐ॥ ॐ॥ ॐ॥ ॐ॥ राम॥
रव्यापि चेत्यर्थः हरौ कपौ सुग्रीवः सुकाहि कपि श्रेष्ठो हरिरण्यकपिलो विविस्यमरा सख्यं सुहृद्धधः॥५७॥ स इति॥
वीरः स रामो वालिने सुग्रीवाग्रजं हत्वा चिरकांक्षिते तस्य ह वालि स्थाने धातोः आप्ता मिवं दिरेशतं भूतं धातवं तरमिवे
त्यर्थः॥ सुग्रीवं संन्यवेशयत् स्थापितवान् यथाश्रुतं सूरिरिति आपत्ति धातोः स्थाने आहेशात्सु धातुरर्थ कार्यमशेष

काव्यतन्त्र

२०८.१२

१२ समभिधत्ते तद्व्यक्तिभावः। आदेशो नाम यदा कान्तरस्य स्थाने विधीयमानशब्दान्तरमभिधीयते ॥५८॥ इतस्ततश्चेति ॥
वैदेहीमन्वेष्टुं मार्गितुं मन्ये सुग्रीवेण चोदिता प्रेरिताः कपयो हनुमत्प्रमुखा आर्त्तस्य विरहातुरस्य रामस्य मनोरथा का मा
12 उव इतस्ततः प्रसरः नाना देशेषु वव्रमुः ॥५९॥ प्रवृत्त्याश्विति॥ संपातिर्नाम जटायुषो ज्यायान् भ्राता तस्य दर्शनात् हनुमत्प्रमुखा वानर
इतस्ततो ऽवैदेहीमन्वेष्टुं मन्ये नोदिताः। कपयश्चेरुरार्त्तस्य रामस्येव मनोरथाः ॥५९॥ प्रवृत्तावुपलब्धायां त
स्याः संपातिदर्शनात् ॥ ॥ मारुतिः सागरं तीर्णः संसारमिव निर्ममः ॥ ६० ॥ ॥ ६१ ॥
स्पर्शेः। तस्याः सीतायाः प्रवृत्तौ वार्त्तायां। वार्त्ता प्रवृत्तिर्वृत्तान्त इत्यमरः॥ उपलब्धायां ज्ञातायां सत्यां मारुतस्यापत्यं पुमान् मारुतिः
हनुमान् इत्यर्थः ॥ सागरं ममेत्यव्ययं ममता वा विद्यते यस्य स निर्ममः निस्पृहः संसारमिव विधा वंधनस्थित वतीर्णः रामः
संसारतरतैः कारितैः ॥ ६० ॥ १२

दृष्टेति ॥ लंकायां रावणस्य राजधान्यां विचिन्वता मृगयमाणेन तेन मारुतिना राक्षसीभिर्वृता जनकात्मजा विषवल्लीभिः परितापपरि
वृता महौषधिः संजीविनी लतेव दृष्टा ॥ ६१ ॥ तस्मा इति ॥ कपिर्हनुमान् भर्तू रामस्य संबंधि अभिज्ञानार्थं प्रत्यभिज्ञानसाध
नेन अंगुलीयं मेवं अंगुलीयकं ऊर्मिका । अंगुलीयमूर्मिकेत्यमरः ॥ जिह्वामूलांगुलेश्छ इति छः प्रत्ययः ॥ तत्र स्थे जानकी ...

दृष्टा विचिन्वता तेन लंकायां राक्षसीवृता ॥ जानकी विषवल्लीभिः परीतेव महौषधिः ॥ ६१ ॥ तस्यै भर्तुरभिज्ञा
नमंगुलीयं ददौ हरिः ॥ प्रत्युद्गतमिवानुष्णैस्तदानंदाश्रुबिंदुभिः ॥ ६२ ॥ निर्वाप्य प्रियसंदेशैः सी
तां रक्षोवधोद्धुरः ॥ स ददाह पुरीं लंकां क्षणसोढारिनिग्रहः ॥ ६३ ॥

दे ॥ अनुष्णैः शीतलैः तस्या आनंदाश्रुबिंदुभिः ॥ प्रत्युद्गतमिव स्थितं भर्तुरभिज्ञानं दर्शनानंदबाष्पजालस्य वर्षात् ॥ ६२ ॥ निर्वा
प्येति ॥ स कपिः प्रियस्य संदेशैः वाचिकैः सीतां निर्वाप्य सुखयित्वा अक्षस्य रावणकुमारस्य वधेनोद्धतो दृप्तः सन् क्षणं
सोढः अरेरिन्द्रजितः कर्तुर्निग्रहो वा बंधो ब्रह्मास्त्रबंधनरूपो येन स तथोक्तः सन् लंकां पुरीं ददाह भस्मीचकार ॥ ६३ ॥

म० १०

२०स०१२
१३
13

तस्याभिज्ञानं कृती कृतकृत्यः कपिः स्वयमायातं मूर्त्तिमद्वैदेह्या हृदयमिव स्थितं तस्याः स्वयं तस्य अभिज्ञानरत्नं च
रामायादर्शयत् ॥६४॥ स इति। हृदये वक्षसि न्यस्तमणेरभिज्ञानरत्नस्य स्पर्शेन निमीलितो यो हि ततः स रामः
अविद्यमानः पयोधरसंसर्गः स्तनस्पर्शो यस्यां सा तथोक्तां प्रियाया आलिंगनेन या निर्वृतिस्तां प्राप ॥६५॥

तस्याभिज्ञानरत्नं च रामायादर्शयत्कृती ॥ हृदयं स्वयमायातं वैदेह्या इव मूर्त्तिमत् ॥६४॥ स प्राप हृदयन्य
स्तमणिस्पर्शनिमीलितः ॥ अपयोधरसंसर्गां प्रियालिंगननिर्वृतिं ॥ ६५॥ श्रुत्वा रामः प्रियोदन्तं
मेने तत्संगमोत्सुकः ॥ ॥ महार्णवपरिक्षेपं लंकायाः परिखालघुं ॥ ६६॥ ७ ॥

श्रुत्वेति। प्रियाया उदन्तं वार्त्तां ॥ उदन्तः साधुवार्त्तायामिति विश्वः। श्रुत्वा तस्याः सीतायाः संगमे उत्सुको रामो लंकायाः सं राम०॥
बन्धी यो महार्णवः समुद्रः परिक्षेपः परिवेष्टनं तं परिखालघुं दुर्गवेष्टनवस्तुतरं मेने ॥६६॥ छ ॥ रामा ॥ १२

स इति ॥ केवलमेकं भुवः पृष्ठं भूतलं न किंतु व्योम्नि च संबाधवर्त्मभिः संकटगामिभिः हरिसैन्यैः कपिबलैरनुद्रुतोऽन्वि-
तः सन् ससैन्योऽरिनाशाय प्रतस्थे चचाल ॥ ६७ ॥ निविष्टमिति ॥ उदधेः कूले निविष्टं तं रामं विभीषयतीति शत्रूनिति वि-
भीषणो रावणानुजो राक्षसलक्ष्म्या स्नेहाद् बुद्धिं मनसमाविश्य नोदितः प्रेरितः सन्निव प्रपेदे प्राप ॥ ६८ ॥ तस्मा इति ॥ राघवः

स प्रतस्थेऽरिघाताय हरिसैन्यैरनुद्रुतः । न केवलं भुवः पृष्ठे खेऽपि संबाधवर्त्मभिः ॥ ६७ ॥ निविष्टमुदधेः कूले
तं प्रपेदे विभीषणः । स्नेहाद्राक्षस व बुद्धिमाविश्य नोदितः ॥ ६८ ॥ तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघ-
वः ॥ काले खलु समारब्धाः फलं बध्नन्ति नीतयः ॥ ६९ ॥ ७ ॥ ७ ॥

तस्मै विभीषणाय प्रत्यासन्नाय भुवः पृथ्व्याः कर्त्रे इति । संप्रदानत्वाच्चतुर्थी ॥ निशाचरैश्वर्यं राक्षसाधिपत्यं प्रतिपन्नोऽङ्गी-
कृतवान् तथा हि ॥ कालेऽवसरे समारब्धा आक्रान्ता नीतयः फलं बध्नन्ति रचयन्ति जनयन्तीत्यर्थः ॥ ६९ ॥ १२

२.ती.१२
१४ सङ्गति। ससैन्यः लक्ष्मणं हत्वा रं सुग्रीवपत्यासो लक्ष्मणो भाः तस्मिन् लक्ष्मण सौम्रवगैः प्रपेतु प्लवैः शार्दूलः विभीषणः स्वप्रायश
प नोपरस्मात तल्लाख्यानालाउन्मत्तसुहृतं शोषं समरशायितं सेतुं बंधयामास ॥७०॥ तेनैलिंगितेन सेतुनापयाउत्तीर्य समुद्र
१.प्र तिशेषः। पिंगलैः सुवर्णवर्णैः रत्नस्वर्द्वितीयं हेमप्राकारं कुर्वद्भिरिव स्थितैः वानरैः लंकां रोधयामास वेष्टयामास ॥७१॥
स सेतुं बंधयामास प्लवगैर्लक्ष्मणाश्रितः। रसातलात् दैवात् सौ शेषं स्वप्रायशार्दूलः ॥७०॥ तेनोत्तीर्य पथा
लंकां रोधयामास पिंगलैः ॥ द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥७१॥ रणः प्रवृत्ते तत्र भीमः प्लवगर
क्षसां ॥ ॥ ॥ ॥ दिग्विजं मितकाकुत्स्थ पौलस्त्यजयघोषणः ॥ ७२॥ ॥ ॥ १७॥ राम.॥
रणः इति॥ तत्र लंकायां प्लवगानां रक्षसां च भीमो पशब्दो यस्मिन् स तथोक्तो रणः प्रवर्त्ते प्रवृत्तः। अत्र द्विषां समरे तनु केरणः। १४
कलहविग्रहाविन्ममरः ॥ ७२॥

पादपेषि ।। किं विधो रखः पादपेषु सेराविक्राभयाः परिघाल्लोवरु काष्ठानि यस्मिन् सत तथोक्तः । परिघः पादिघातनः स्यमरः ।। शि
लाभिर्निर्घिष्ठा अर्चिता मुद्गरा अयोघना यस्मिन् ।। सत तथोक्तः । दुघनो मुद्गर घना विस्यमरः ।। अतिशस्त्रा तापतिक्रांताः
नखन्यासा यस्मिन् सत तथोक्तः शैलेरुग्राभ्याम तेगजा यस्मिन् सत तथोक्तः । ७३ ।। अथेति । अथानंतरं छिद्यत इति छेदः

पादपाद्विद्गुपरिघः शिलानिष्पिष्टमुद्गरः । अतिशस्त्रनखन्यासः शैलरुग्णमतंगजः ।। ७३ ।। अथ रामशिरश्छे-
दं ददर्शनो ज्जांतचेतना ।। ।। ।। ।। सीतां मायेति शंसंती त्रिजटा समजीवयत् ।। ७४ ।। छं ।।

छेदं ः शिरश्छेदं ददर्श इति विग्रहः । रामः शिरछेदस्य विद्युज्जिह्वाख्यराक्षसमायानिर्मितास्य दर्शने नोज्जांतचेतना गतसंज्ञां सीतां
त्रिजटानामका त्रिजटासीता पतिव्रता निराक्षसीमायानिर्मितं न त्वेतत् सत्यमिति शंसंतीबुधाना । शापुरखनोर्विस्यमिति 18
नित्यं सुमागमः ।। समजीवयत् ।। ७४ ।। छं ।। राम ।। राम ।। राम ।। राम । राम ।।

२.सी.१२ कामम् इति। सा सीता मे नाथः जीवतीति हेतोः शुचं शोकं कामं जहौ। किं तु प्राक् पूर्वं तस्य नाथस्यान्तं नाशं सत्यं यथार्थं मत्वा जी
१५ विताऽस्मीति हेतोः। जीवितव्यस्यास्तित्वहेतोर्लज्जिता लज्जावती। कर्त्तरि क्तः। दुःखादपि दुःसहो लज्जाभर इति भावः ॥७५॥
15 गरुड इति। गरुडस्यागतस्यापातेनागमनेन विश्लिष्टमेघनादस्येन्द्रजितोऽस्त्रेण नागपाशेन बन्धं बन्धनं ययोस्तयोर्दाशरथ्योः राम

कामं जीवति मे नाथ इति सा विजहौ शुचं ॥ प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता ॥७५॥ गरुडापात
विश्लिष्टमेघनादास्त्रबंधनः। दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत् ॥ ७६ ॥ ततो बिभेद पौ
लस्त्यः शक्त्या वक्षसि लक्ष्मणं ॥ ॥ रामस्त्वनाहतोऽप्यासीद्विदीर्णहृदयः ॥ शुचा॥७७॥
लक्ष्मणयोः रामलक्ष्मणयोः क्षणक्लेशः स्वप्नावस्थः अनुभूत इवाभवत् ॥७६॥ ततः इति। ततः पौलस्त्यो रावणः शक्त्या कासूना
मकेनायुधेन। कासूः सामर्थ्ययोः शक्तिरित्यमरः। लक्ष्मणं वक्षसि बिभेद विदारयामास रामस्त्वनाहतोऽपि अप्रहतोऽपि शु राम.॥
चा शोकेन विदीर्णहृदय आसीत् ॥७७॥ १५

स इति। स लक्ष्मणो मारुतिनाम पवनसुतेन हनुमता आनीतया महौषध्या संजीविन्या हतव्यथः। स नु पुनः शरैः लंकास्त्रीणां विलापे परिदेवने॥
विलापः परिदेवनमित्यमरः। अत्र कार्यकर्मणा कार्यकर्मणोपपन्नकुरुपोतमाहुः इति तुल्यत्वः। चक्रे पुनरपि तस्मात् जघालेत्यन्वये॥१८॥

स मारुतिसमानीतमहौषधिहतव्यथः। लंकास्त्रीणां पुनश्चक्रे विलापाचार्यकं शरैः॥७८॥ नादं स मेघनादस्य धनुश्चेन्द्रायुधप्रभम्।
मेघस्येव शरत्कालो न किंचित्पर्यशेषयत्॥७९॥ लक्ष्मणेन महता निशितास्त्रजितेन रणदुर्जयेन रणः शेषयामास पुण्यापातुं जमाव स्वनः १८.

स नादमिति। स लक्ष्मणः शरत्कालो मेघस्येव मेघनादस्य इन्द्रजितो नादं चान्यत्र गर्जितं चेन्द्रायुधप्रभं शक्रधनुःप्रभं धनुश्च किंचिदल्पम
पि न पर्यशेषयत् नावशेषितवान् अवधीदित्यर्थः॥ ७९॥ ॐ॥ रामः॥ ॐ॥ ॐ॥ ॐ॥ ॐ॥ ॐ॥

२.री.१२ कुंभकर्णेऽतिकपीन्द्रे लक्ष्मसुग्रीवेऽलक्ष्यसुः सुदर्पनस्वापाः तुल्यावस्थानासाकर्णच्छेदेन सदृशाः सन्तः कुंभकर्णेः र्दकेन शालिनाये इक्ष्वाकुशास्त्ररणच्छि त्वा
१६ मनः शिलारक्तौ वर्णे धातुविशेषौ पस्पसत यो क्तः । दक्षः पाषाणे ये इनः धातुर्मनः शिला पढे रितिवामरः । श्रृंगमिति शिखरसीवरामं रुद्रोधुः ॥८०॥
16 श्रुकाल इति । प्रियपक्षप्रेश्वरीति उग्भवान् दृष्या श्राशारावलेना काल्ये बोधित इतीव अस्तौ कुंभकर्णः रामेषुभिन्नीदीप्ति उग्मवरण प्रवेषितो
कुंभकर्णकपीन्द्रेण तुल्यावस्थः सशत्रुः सन्तः । क्षरोधरामे श्रृंगीवरं कच्छिन्नमन शिलः ॥ ८१॥ श्रुकाले वधितो श्राशा प्रियपक्षप्रानिशाच
रः रामेषुभिरितीवा सोहीदीप्तिः शन्निवेशितः ॥८२॥ इतराण्यपि रत्तांसि पतुवीनरकोटिभुरजो सिसमरोत्थानितडैणतनहीद्विवाद्दृ ।

गमितः पथा लोके गुरुश्चवस्तुविनाशाद्दुःखितस्य ततोऽपि भूपिष्ठमुपपाद्यते तद्वदिति भावः ॥८१॥ इतराणीति । इतराण्यपि रत्तांस्यपि वानरको राम.॥
टि भुसमरोद्धानिरजोसितेषां रत्तसां शोणितनहीभुरक्तौ प्रवाहेषु रक्तवेपतुः निपत्य मृता इत्यर्थः ॥ ८२॥ ॥ छं॥ राम.॥ १६

निर्दयपाविति। अथ पोलस्त्यो रावणः अथ जगत्त्रातारं रामं रामधूम्रं वमवेदितिनिक्षिप्तवान्। कीर्तिरिक्तः। विजयमारणपो
रन्धोन्यतर नि प्रथवान् पुनर्पुजापमं हिरात्रिर्पेयोनि जैगाम॥८३॥ रामम्पिनि। पातभ्यामनीतिपद्मतिः तं पादचारिणा रामं वस्
पोरथगुप्तिः। रथगुप्तिर्वरूथो ने त्यमरः। अथ रवरूपेन रथपोलस्त्यतो॥ वरूथिनं रथिनं तं केशं चालोक्य पुरंदर इन्द्रः पुंगवः हन्तीति पुंग्वा

निर्दयपादपपोलस्त्यः पुनर्पुष्पमंदिरात्॥ अथ रावणमरामं याजगदधेति निक्षिप्तः। ८३। रामं पदातिमालोक्य लंकेशं च वरूथि
नं हरिः पुंगवः रथं तस्मै प्रजिघाय पुरंदरः। ८४। तमारूह्य ध्वजपटं यो मगंगोर्मि वायुभिः देववरूतनुजालं वीजै ... रघवः॥८५॥

रघ्याश्वाः। तद्धृत इति रथ्याधुगाश्वासंगश्वा ... इति पद्मपत्यपः। हरिः पुंगवं कपिलवर्णं हरिर्नी कपिलो ... इत्यमरः। रथं तस्मै रामाय प्रजिघा
पप्रहितवान्॥८४॥ तमिति। सप्तवा यो मगंगोर्मि वायुभिः धूतध्वजपटं मार्गवधादिति भावः। जैनेन वजेन्द्रः जयशीलः तं जैत्रं जैत्र
शक्रानन्तं तारुण्य ... इत्यपरः। तं रथं देववरूतनुजालवी मातलिः ... अध्यासितवान्॥ आस
लेद॥ ८५॥

र.सी.१२
१७
17

मातलिरिति । मातलिरिंद्रसारथिः । माहेंद्रं इंद्रसंबंधि तनुच्छदं वर्म । पुंसि संनाहो वर्म कवचः प्रावरणमिति धः । तस्य रामस्य आमुमोचासं
जयामास यत्र तनुच्छदे सुरद्विषामस्त्राणि उत्पलदलक्लैब्यं उत्पलदलानां क्लैब्यं नपुंसकत्वं निरर्थकत्वं तत्र आपुः ॥ ८६ ॥ अन्योन्येति । चिरात् अन्योन्यदर्शनेन

मातलिस्तस्य माहेंद्रमामुमोच तनुच्छदं । यत्रोत्पलदलक्लैब्यमस्त्राण्यापुः सुरद्विषां ॥ ८६ ॥ अन्योन्यदर्शनप्राप्तविक्रमाव
सरं चिरात् ॥ रामरावणयोर्युद्धं चरितार्थमिवाभवत् ॥ ८७ ॥

प्राप्तविक्रमावसरं रामरावणयोर्युद्धं चरितार्थं सफलमभवदिति । प्राप्तः पराक्रमावसरो येन तत् । चिरात्प्राप्तफलस्यास्य तत्प्राप्तसाफल्य
युक्तं ह्येतत् ॥ ८७ ॥

रा.स.।
१७

भुजेति। यथाभूतपूर्वं यथापूर्वः सुसुपेति समासः। यथापूर्वो न भवतीत्ययथापूर्वः। निहतबंधुत्वात् ततः परिवारशून्य इत्यर्थः। अतएव
कोऽपि सन् धनदानुजो रावणः भुजो भ्रम् ऊर्जीन भोरवपात्र भ्ररवपात्र भ्र भुज मूर्ध्नोरु प्राण्येव है ह गाके वज्रावऽत स्व या उल्या दनु
त्वाके तोः तेद्द उत्वेपाद वः। दशास्यो विंशतिभुज इत्युभाभ्यां न मंदिर इति मातृवंशे मातुः सर्वे पि निवंशवर्गे स्थित इव दृदशो दृशो
हि। वंशो वेलो कुलवर्ग इति विश्वः। अत्र रावण मातुः रत्नाज्ञातित्वान्नद् गोरक्षोव गे इति लभ्यते। अतएवेकोप्यनेकरही
भुजो न मांगता उल्या दकोऽपि धनदानुजः। दद्शो सोऽपत्यापूर्वं मातृवंश इव स्थितः ॥८८॥ जेतारं लोकपालानां
स्वमुखैरर्चितेश्वरं॥ रामस्तुलितकैलासमरातिं बह्वमन्यत ॥८९॥
परि वृत्तरवल तत इत्यर्थः ॥८८॥ जेतारमिति। लोकपालानामिंद्रादीनां जेतारं। कर्तरि कर्मणि चेति कर्मणि षष्ठी। मुखैः शिरोभि
रर्चितेश्वरं तुलितकैलासः उत्क्षिप्त कंपितं मेवं शौर्यैः पसत्वसंपन्नं महावीर्यं अरातिं शत्रुं रामो गुणग्राहित्वाज्जेतव्यो
त्कर्षस्य जेतुः स्वोत्कर्षहेतुत्वाद्बह्वमन्यत साधुमहिक्रमस्याप्यपर्याप्तो विघ इति बहुमानमकरोदित्यर्थः। वह्नि तिक्त पावि
शेषणं ॥८९॥

२·सी·१२
१८ तस्मिंस्येति। अधिकक्रोधः पौलस्त्यः स्फुरति स्वं ध्याने अत एव सीतां संगमहं सीसिनि तस्य रामस्य सख्युः तेरो यस्मिन् सख्ये तेरे हसिते न
व ऊ श्रीहाचिलि इतरश दस्य सर्वनाम संसा प्रतिषेधः।। भुजे शरं निचखान निखान वा।। ९०।। रावणस्येति। रामे णत्त्वं क्षिप्तः आप्सु गो

तमस्फुरति पौलस्त्यः सीतासंगमसंशिनि। निचखानाधिकक्रोधः शरं सख्येतरे भुजे।। ९०।। रावणस्यापि रामास्तो भित्वा हृ
दयमाशुगः।। ।। विवेश भुवमाख्यातुमुरगेभ्य इव प्रियं।। ९१।।

काणः विश्रुसो यस्तं रावणः विश्रवः शरा हृदयस्यार्थे अणप्रत्यये सति विश्रवणरवणा वित्यिश्रवः रावद्यस्य रवणो देशः तस्य रावणस्या राम०।।
पि हृदयं वक्षो भित्वा उरगेभ्यः पातालवासिभ्यः प्रियमाख्यातुमिव भुवं विवेश।। ९२।। ९३।। ९४।। ९५।। ९६।। १८

ववसेति। वाक्संवच्चसे वास्त्रं स्त्रशस्त्रेण निघ्नतोः प्रतिकुर्वतोः तयोः रामरावणयोः वादिनोः कथयोरिवान्योन्यविक्षेपसंरंभो ववृधे ॥ ९२ ॥
विक्रमेति ॥ जयश्रीर्विक्रमस्य व्यतिहारेण पर्यायकरणेन तयोर्द्वयोरपि अन्तरा अन्तर्मध्ये तत् वेदिर्द्विधाकारा भित्तिः मत्तवारणयोरिव
सामान्या साधारणाभूत् । नत्वन्यतरनियतेत्यर्थः । अत्र मत्तवारणयोरित्यनेनान्तरान्तरेण युक्ते इति द्वितीया न प्रवर्तिता । अन्तरशब्दस्या
कैसीभाव्यत्वान्वयान्मध्ये एकामपि भित्तिं कृत्वा गजा योधयन्तीति प्रसिद्धिः । ९३ ॥ कृतेति ॥ त्वयमस्य प्रयोगः ॥ योगः कृतं प्रतिकृतं पर
ववसा यतयोर्वीरसंशस्त्रमस्त्रेण निघ्नतोः । अन्योन्यजयसंरंभो ववृधे वादिनोरिव ॥ ९२ ॥ विक्रमव्यतिहारेण सामान्याभूद्द्वयोरपि
॥ ० जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव ॥ ९३ ॥ कृतप्रतिकृतप्रीतैस्तयोर्मुक्तां सुरासुरैः । परस्परशरव्राताः पुष्पवृष्टिं न सेहिरे ॥ ९४ ॥
कृतं प्रतीकारः ताभ्यां प्रीतैः सुरासुरैर्यथासंख्यं तयोः रामरावणयोर्मुक्तां पुष्पवृष्टिं द्वयीमपि तिशेषः । परस्परं शरव्राताः न सेहिरे । अहमे
वालं किं त्वयेति यान्तरालएव तरन्तरवाणा रुधिरितेरतर पुष्पवृष्टिमवारयदित्यर्थः ॥ ९४ ॥ राम ॥ राम ॥

र.सि.१२
१९
19

अय इति। अयसा लोहानावलः अयसः शंकुभिः कीलैः चितां व्याप्तां शतघ्नीं शतघ्नी चतुर्हस्ता लोहकण्टकसंचिता परिघरिति केशवः॥ हृतां
विपज्वलन्तीं वैवस्वतस्यान्तकस्य कूटशाल्मलिमिव शत्रवे रावणाय आक्षिपत्क्षिप्तवान्। कूटशाल्मलिस्त्वायं वैवस्वतगदा यो गोलमी
संज्ञा कूटशाल्मलिनाम सूलमयलिंगः कूटकोरतविशेषः रावणः कूटशाल्मलिरित्यमरः। तत्स्वाहइत्यगदयाः अयःशंकुचितेत्य

अयःशंकुचितां रक्षः शतघ्नीमथ शत्रवे॥ हृतां वैवस्वतस्येव कूटशाल्मलिमाक्षिपत्॥९५॥ राघवो रथमप्राप्तां
तामाशांच सुरद्विषः॥ अर्द्धचन्द्रमुखैर्बाणैश्चिच्छेद कदलीमिव॥ ९६॥

तु संक्षेपं॥९५॥ राघव इति। राघवो रथं अप्राप्तां तां शतघ्नीं सुरद्विषां रक्षसां आशां विजयतृष्णां च आशात्स्यादिशोः प्रोक्तेति विश्वः।
अर्द्धचन्द्रमुखं येषां तैर्बाणैः कदलीवत्सुखं यथा तथा चिच्छेद अयत्नाकदल्या मिव सुखमनेकशो पक्षिन्नकर्मेति तादृक्तिविग्रहः॥ र.व.॥
१९

अम्भोधिमित्तिनां एकोद्वितीयः एकधनुर्धरो रामः त्रिपाशाशोकराल्वराल्वंतस्यानिशूर्पिणं अन्धारकं पदेहोवपुंतस्मोयं ब्रह्मास्त्रं ब्रह्मरेवतानं
अस्त्रं अम्भमिमंत्रितं वाणं मस्ये रावणं पतदधार्थेमिस्वर्थः। धनुर्विसंदधौ ॥ १७ ॥ तदितिना। व्याम्निरातधाम्निं [illegible]
अम्भोधिसंधेरम्भोधनुर्ध्यकधनुर्धरः। ब्रह्मास्त्रमस्त्रं त्रिपाशोकराल्वनिःकृषे नैवधं ॥ १७ ॥ लघ्वोम्निःराधाम्नि
दद्रोतस्निमनुरवो। वपुर्यम्होरगस्यवकरालफणमंडलं ॥ १८ ॥ तेन मंत्रपुतेन निमिषेण पार्थःपालपदा। रामो
दिपुरिशः पंक्तिमस्तातवृणवेदनां ॥ १९ ॥
अथर्तिं तस्निमंतिमुखानि यस्य तद्भुजास्त्रंकरालं भीषणं वाफणमंडलं यस्य तत्त्वयोक्तं। करालोदंतुगेकरालो भीषणेपिदेवतिविस्मयः
महोरगस्य शेषस्य वपुरिवदृशदृशोदिष्ट ॥ १८ ॥ तेनेति। स रामोमंत्रपुतेन तेनास्त्रेण स्नातवृणवेदनां अथनिशो घ्राणेनतुभूतवृणं
दुःखां रावणशिरः पंक्तिं निमेषार्धेपातयस्नातपामास ॥ २० ॥ ॐ ॥ ॐ ॥ प.॥ १९

२.सी.१२

२०

20

यत्नेनिापतिष्यतः आसन्नपातस्यरत्नःकायस्यावणकलेवरस्याधि पतत्त्विदेहः खंडःकृं नांदेहः तेषां परंपरा पंक्तियो विर्भिन्ना
नानास्रता अस्तु वात्नाकैस्य प्रतिविंवमिवर● राजा अर्कस्य वालविशेषणमारूल्पार्थः ॥१००॥ मरुतामिति॥ पतिताति

वालार्के प्रतिमेवासुः वीचिभिन्नापतिष्यतः रराजरत्नःकायस्यकंठदेहपरंपरा ॥१०१॥ मरुतोपस्पतो तस्य शिरां
सिपतिताम्यपि॥ ॥ मनोनायाति विश्वासंपुनःसंधानशंकया॥ १०२॥

रायणशिरांसिपस्पतामपिपुनःसंधानशंकिमां कुर्वंतपारशीनाहितिभावः॥ मरुतामम्मरालं मरुतोपवनावशमित्यमरः॥ मनो रामः॥
नाति विश्वासानि विश्वासंनयाप॥१०२॥ ॐ॥ राम॥ राम॥ राम॥ राम॥ राम राम॥ राम॥ २०

श्रुत्वेति। श्रुत्वा महेन्द्रगजगं ३ संचारसंक्रान्ते नगरूपतेः संचारात्पमानपतेरलिद्वं हे लोकपालद्विपानां ऐरावणानां दिशां गजानां च विनी
गं ३ भित्वा विलिपानुगतं सुभिस्तुगं स्थि।। सुरभिस्तु पञ्चस्वर्ग्ये ज्ञातिफलं वसंतपोऽगन्धोपले सौरभेय्यां संल्लकी मानभेद योसुगं
धौवमनोऽसैवचासवन्मुरभि स्नतमितिविश्वः। सुरविमुक्तं उष्णवर्षं उपनतमास्त्रेऽमलिवं धौराज्याभिषेकसमयं भावी
पस्यतस्मिन् पौलस्त्य। शत्रोरामस्य मूर्छितपपात तुहमेव राज्याभिषेके सूचकमितिभावः।।१०२।। पंतेति। हरेरिन्द्रस्य पंता
श्रुत्वा महेन्द्रगजरूपतेलोकपालद्विपानाः। मनुगतमलेवं दन्तें ३ भित्वा विलिपउपनतमस्त्रिं वं धे मूर्छितं पौलस्त्यशत्रोः सुरभि
सुरविमुक्तं उष्णवर्षं पपात।।१·२।। पंताहरेः सपदिसंहतकार्मुकज्यमापृच्छ्य राघवमनुष्ठितदेवकार्यं। नामांकरावण
शरांकितकेतुयष्टिमूर्ध्वं रथं हरिसहस्रयुजं निनाय।। १·३।।
मातलिः सपदिसंहृतकार्मुकज्यमनुष्ठितदेवकार्यं राघवं वधरूपं येन तं पृच्छ्य माष्टच्छ्य साधुपामीत्यसंध्य नामांकैर्नामा तरशिलैः
रावणशरैरंकितां चिह्नितां केतुयष्टिं ध्वजदण्डं यस्य तं हरीणां वाजिनां सहस्रेण युज्यत इति हरिसहस्रयुक्तं यमानीतं ऊर्ध्वं

२.सी.१२
२१
21

रघुपतिरिति। रघुपतिरपि जातवेदः समयो विशुद्धां ज्ञातशुद्धिं प्रियां सीतां प्रगृह्य स्वीकृत्य प्रियसुहृदि विभीषणे वैरिणः रावणस्य श्रि
यं राज्यलक्ष्मीं संगमय्य संगतां कृत्वा। गमेर्ण्यन्तात्ल्यप् मितां ह्रस्व इति ह्रस्वः। ल्यपि लघुपूर्वादित्ययादेशः। रविसुतसहितेन सुग्रीवयु
तेन ससौमित्रिणा सलक्ष्मणेन तेन विभीषणेनानुयातोऽनुगतः सन् विमानेषु रत्नमिव विमानरत्नं ३ मयूरव्यंसकादित्वात्समासः। भुजविजि
तं च विमानरत्नं पुष्पकं तेन लोकपालशोभि रत्नपक्षिसंघो मयूरव्यंसकादेराकृतिगणत्वात्। पुरा एव प्रहृत्य मनुवंशोद्भवा रामं विराममविपतं नुपा

रघुपतिरपि जातवे, दो विशुद्धां प्रगृह्य प्रियां प्रियसुहृदि विभीषणे संगमय्य श्रियं वैरिणः। रविसुतसहितेन तेनानुयातः
ससौमित्रिर्भुजविजितविमानरत्नाधिरूढः प्रययौ पुरीं॥ १०४॥ ॥ ॥ ॥ ॥

सतत्त्वरूढः स च पुरीमयोध्यां च तस्यो समयः प्रविभ्य। स्यात्स्मादनेनपदं। श्रुत्वा स्यात्। रचितापापाश्च कर्मकर्तृत्वेऽपि तदंगमभूतो देशश्चिपापदहृ रा.स.॥
पाकर्मत्वं श्रुत्यित्व धातूनां क्रियान्तरोपसर्जनकसाध्यामिधायकत्वं यथा कुसुमानि वनी तस्मात्तवातनचक्रियागर्भः पाकोविधीयत २१
इति॥ १०४॥ ॥

र०स०१२
२२

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथविरचितायां रघुवंशसंजीविनीसमाख्यायां रावणवधो नाम द्वादशः सर्गः ॥

इति श्रीरघुवंशे महाकाव्ये कविकालिदासकृतौ रावणवधो नाम द्वादशः सर्गः ॥ १२ ॥ ॥ राम ॥

॥१२॥ शुभमस्तु ॥ शुभं भूयात् ॥ सर्वस्तिस्तेन दातव्यं एवं वदंति पुस्तकं ॥ ॐ गुरुचरणेभ्यो नमः ॥ ॐ कपर्दिने नमः ॥ राम ॥ २२ २१ ।

नं. ३५१६

